सर्व्वतः स्थाने विश्वतो वृत्वा स्थाने सृष्ट्वा इत्यपि पाठः। इति पठित्वा भगवन् विष्णो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इह सन्निरुद्धस्व मम पूजां गृहाण। ततो यथाविध्यासनमानीय षमिति वरुणबीजेनार्घ्याम्भसा संप्रोक्ष्यासनमभ्यर्च्य ॐ पुरुष एवेदं सर्व्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति २। इति पठित्वा इदममुकासनं ॐ नमो भगवते वासुदेवाय श्रीविष्णव नमः। एवं सर्व्वत्र दाने। ॐ भगवन् विष्णो स्वागतम्। इति स्वागतप्रश्नः। ततस्ताम्रपात्रस्थं पद्मश्यामाकदूर्व्वापराजितादियुक्तं जलं गृहीत्वा ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोऽस्य विश्व भूतानि त्रिपादस्यामृतं दिवि ३। इति पठित्वा इदं पाद्यं पूर्व्ववन्मूलेन पादयोर्द्दद्यात्। ततो गन्ध-पुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्व्वायुक्तजलं शङ्खादिपात्रे कृत्वा ॐ त्रिपादूर्द्ध्वं उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विश्वङ्व्यक्रामत् शाशनानशने अभि ४॥ ततः स्थाने तस्मादित्यपि पाठः। इति पठित्वा सामगानामिदमर्घ्यमन्येषामेषः अर्घः इति शिरसि दद्यात्। जातीलवङ्गकक्कोलयुक्तं केवलं वा पात्रस्थं जलं गृहीत्वा ॐ ततो विराड़जायत विराजोऽधिपुरुषः स जातोऽत्यरिच्यत पश्चाद्भुविमथो पुरः ५॥ इति पठित्वा इदमाचमनीयं ॐ नमो भगवते वासुदेवाय श्रीविष्णवे स्वधा इति दद्यात्। ततः कांस्यपात्रस्थं दधिमधुघृतात्मकं कांस्येन पिहितं मधुपर्कं गृहीत्वा ॐ तस्माद्यज्ञात् सर्व्वहुतः संभृतं पृषदाज्यं पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ६॥ इति पठित्वा एष मधुपर्कः ॐ नमो भगवते वासुदेवाय श्रीविष्णवे स्वाहा इति दद्यात्। ततः पूर्व्वमन्त्रं पठित्वा पुनराचमनीयञ्च दद्यात्। कर्पूरवासितजलं गृहीत्वा ॐ तस्माद्यज्ञात् सर्व्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ७॥ इति पठित्वा इदं स्नानीयजलं मूलेन दद्यात्। पूर्व्ववत् पुनराचमनीयं दत्त्वा वस्त्रं गृहीत्वा ॐ तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ८॥ इति पठित्वा इदं वस्त्रं मूलेन दद्यात्। एवमुत्तरीयवस्त्रं यज्ञोपवीतं पूर्व्ववदाचमनीयं दत्त्वा आभरणं गृहीत्वा ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऋषयश्च ये ९॥ इति पठित्वा मूलेन दद्यात्। ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते १०। ऋग्वेदस्याश्वलायनशाखायान्तु मुखं किमस्य कौ बाहू कावूरू पादा उच्येते इति भेदः। इति पठित्वा मूलेन गन्धं दद्यात्। ॐ ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ११॥

इति पठित्वा मूलेन पुष्पं दद्यात्। ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत १२॥ मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत इति च पाठः। इति पठित्वा मूलेन धूपं दद्यात्। ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत। पद्भ्यां भूमिर्द्दिशः श्रोत्रात्तथा लोकानकल्पयन् १३॥ इति पठित्वा मूलेन दीपं दद्यात्। ततो नैवेद्योपरि मत्स्यमुद्रया मूलमन्त्रं दशधा जप्त्वाभ्यर्च्य धेनुमुद्रां प्रदर्श्य ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः १४॥ इति पठित्वा नैवेद्यं मूलेन दद्यात्। ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् १५॥ इति पठित्वा कर्पूरादिवासितं पानीयं ताम्बूलं पुनराचमनीयं दर्पणञ्च दद्यात्। ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः १६। इति पठित्वा अञ्जलित्रयं पुष्पं दत्त्वा आवरणानि संपूज्य मूलमन्त्रं यथाशक्ति जप्त्वा प्रणमेत्। *। ऋग्वेदस्याश्वलायनशाखायान्तु यत्पुरुषेण हविषा इत्यादिना स्नानीयं ६ तं यज्ञं बर्हिषीत्यादिना वस्त्रं ७ तस्मात् यज्ञात् सर्व्वहुतः संभृतमित्यादिना यज्ञोपवीतम् ८ तस्मात् यज्ञात् सर्व्वहुत ऋचः सामानीत्यादिना चन्दनम् ९ तस्मादश्वा अजायन्त इत्यादिना पुष्पं १० यत्पुरुषं व्यदधुरित्यादिना धूपम् ११ ब्राह्मणोऽस्य मुखमासीदित्यादिना दीपम् १२ चन्द्रमा मनसो जात इत्यादिना नैवेद्यम् १३ नाभ्या आसीदन्तरिक्षमित्यादिना ताम्बूलम् १४ सप्तास्यासन् परिधय इत्यादिना नीराजनम् १५ इति भेदः अन्यत् समानम्। *। ततो गुरुः कुण्डपश्चिमे उपविश्य कुण्डे स्थण्डिले वा ब्राह्मविधिना तदभावे स्वगृह्योक्तविधिना साहसनामानमग्निं संस्थाप्य ब्रह्मस्थापनानन्तरं अभिषेकार्थं ऐशान्यां नवमव्रणमश्यामं बहिर्द्दध्यक्षतभूषितं चूताश्वत्थन्यग्रोधोडुम्बरप्लक्षपल्लवच्छन्नमुखं फलवस्त्रयुतं अन्तःक्षिप्तपञ्चरत्नं निर्म्मलजलपूर्णं दृढ़कलसं अक्षतानामुपरि ॐ आजिघ्र कलसमित्यादिमन्त्रेण स्थापयेत्। तत्र वरुणस्योत्तम्भनमसीति वरुणं न्यसेत्।

"ॐ गङ्गाद्याः सरितः सर्व्वाः समुद्राश्च सरांसि च।
सर्व्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥"

इति तीर्थानि च न्यसेत्। तत्रैव कलसे अश्वस्थानाद्गजस्थानात् वल्मीकात् सङ्गमात् ह्रदात्। गोकुलात् रथ्यया आनीय सप्त मृदः क्षिपेत्॥ सर्व्वौषधीश्च॥ *॥ ततश्चरुश्रपणं कुर्य्यात्। अग्नेरुत्तरे द्व्यङ्गुलविस्तारायां प्रादेशपरिमितोडुम्बरनिर्म्मितदर्व्वीं साङ्गुष्ठविस्तारायप्रादेशपरिमितोडुम्बरनिर्म्मितमेक्षणं चरुस्थालीमाज्यस्थाली उदूखलमुषले स्रुवं पूर्णहोमार्थं स्रुचं समिधं आज्यादीनि उदगग्राणि प्राक्संस्थं प्राक्संस्थं विनियोगक्रमेणासादयति। संस्थाप्य यवान् व्रीहीन् वा तदभावे तण्डुलान् शूर्पे निधाय। सामगः। ॐ विष्णवे त्वा जुष्टं निर्व्वपामि। इति यवादिप्रसृतिमेकां चरुस्थाल्यां कृत्वा उदूखलमध्ये स्थापयेत्। यजुर्व्वेदी तु ॐ विष्णवे त्वा जुष्टं गृह्णामि ॐ विष्णवे त्वा जुष्टं निर्व्वपामि चमसस्थजलेन ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति त्रयं कुर्य्यात्। ऋग्वेदी तु ॐ विष्णवे त्वा जुष्टं निर्व्वपामि ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति निर्व्वापप्रोक्षणमात्रम्। यस्य गृहप्रतिष्ठा तस्यादौ जुष्टग्रहणम्। एवं सर्व्वत्र। एवमग्न्यादिषु। ॐ अग्नये त्वा जुष्टं निर्व्वपामि एवं वायवे सूर्य्याय द्विः विष्णवे द्विः अग्नये वायवे पुनरग्नये वरुणाय पुनरपि अग्नये सूर्य्याय प्रजापतये अन्तरीक्षाय द्यवे ब्रह्मणे पृथिव्यै महाराजाय सोमाय इन्द्राय अग्नये यमाय नैर्ऋताय वरुणाय वायवे कुवेराय ईशानाय ब्रह्मणे अनन्ताय आदित्याय सोमाय मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतुभ्य इत्थं नवत्रिंशत् प्रसृतीः स्थापयेत्। हिस्तूर्णौ उपरिकृतदक्षिणवामसुष्टिभ्यां मुषलेनावहत्य शूर्पेण प्रस्फोटयेत्। एवमपरवारद्वयमवहत्य शूर्पेण प्रस्फोटयेत्। तथा कर्त्तव्यं यथा वारत्रयेण तण्डुलनिष्पत्तिर्भवति। तदशक्तौ संस्कारमात्रार्थं तण्डुलेष्वेवम्। ततस्तण्डुलान् त्रिः प्रक्षाल्य चरुस्थाल्याममन्त्रकं कृतोत्तराग्रं पवित्रं निःक्षिप्य तत्र तण्डुलान् निधाय कपिलाया दुग्धं निःक्षिप्य तदभावे अन्यधेनोर्दुग्धं निःक्षिप्य दर्व्व्या प्रागादिप्रदक्षिणमीषद्दूर्द्ध्वमवघट्टयंस्तथा पचेत् यथा दाहकाठिन्यातिशैथिल्यमण्डगालनरहितोऽन्तरुष्मपक्वश्चरुर्भवति ज्वलदुल्मुकेन स्थालीमध्यस्थं चरुं दृष्ट्वा ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततमित्यनेन मन्त्रेण ओमित्यनेन च घृतेन सिक्त्वा दर्व्व्या दक्षिणावर्त्तेन संमिश्रयेत्। ततोऽग्नेरुत्तरतोऽवतार्य्य पुनर्ज्ज्वलदुल्मुकेन स्थालीमध्यस्थं दृष्ट्वा पुनर्घृतेनाभिधारयेत्। ततः पर्य्युक्षणान्तां कुशण्डिकां समाप्य सामगस्तु काम्यकर्म्माङ्गत्वेन तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्त्वञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जपित्वा विरूपाक्षजपं कुर्य्यात्। ततः प्रकृते कर्म्मणि।

"ॐ पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽरुणः।
छागस्थः साक्षसूत्रोऽग्निः सप्तार्चिः शक्तिधारकः॥"

इत्यादित्यपुराणीयं ध्यात्वा विष्णुवेश्मप्रतिष्ठाकर्म्मणि अग्ने त्वं साहसनामासीति नाम कृत्वावाह्य संपूज्य प्रादेशप्रमाणां घृताक्तां समिधं